শ্রী দধিবামনস্তোত্রম
হেমাদ্রিশিখরাকারং শুদ্ধস্ফটিকসন্নিভম|
পূর্ণচন্দ্রনিভং দেবং দ্বিভুজং বামনং স্মরেত||১||

পদ্মাসনস্থং দেবেশং চন্দ্রমণ্ডলমধ্যগম|
জ্বলৎকালানলপ্রখ্যং তডিৎকোটিসমপ্রভম||২||

সূর্যকোটিপ্রতীকাশং চন্দ্রকোটিসুশীতলম|
চন্দ্রমণ্ডলমধ্যস্থং বিষ্ণুমব্যয়মচ্যুতম||৩||

শ্রীবৎসকৌস্তুভোরস্কং দিব্যরত্নবিভূষিতম|
পীতাংবরমুদারাঙ্গং বনমালাবিভূষিতম||৪||

সুন্দরং পুণ্ডরীকাক্ষং কিরীটেনবিরাজিতম|
ষোডশস্ত্রীয়ুতং সংয়গপ্সরোগণসেবিতম||৫||

ঋগ্যজুস্সামাথর্বাদ্যৈঃ গীয়মানং জনার্দনম|
চতুর্মুখাদ্যৈঃ দেবেশৈঃ স্তোত্রারাধনতৎপরৈঃ||৬||

সনকাদ্যৈঃ মুনিগণৈঃ স্তূয়মানমহর্নিশম|
ত্রিয়ংবকো মহাদেবো নৃত্যতে য়স্য সন্নিধৌ||৭||

দধিমিশ্রান্নকবলং রুক্মপাত্রং চ দক্ষিণে|
করে তু চিন্তয়েদ্ধামে পীয়ূষমমলং সুধীঃ ||৮||

সাধকানাম প্রয়চ্ছন্তং অন্নপানমনুত্তমম|
ব্রাহ্মে মুহূর্তেচোত্থায় ধ্যায়েদ্দেবমধোক্ষজম ||৯||

অতিসুবিমলগাত্রং রুক্মপাত্রস্থমন্নম
সুললিতদধিভাণ্ডং পাণিনা দক্ষিণেন |
কলশমমৃতপূর্ণং বামহস্তে দধানং
তরতি সকলদুঃখান বামনং ভাবয়েদ্যঃ ||১০||
ক্ষীরমন্নমন্নদাতা লভেদন্নাদ এব চ|
পুরস্তাদন্নমাপ্নোতি পুনরাবর্তিবর্জিতম ||১১||

আয়ুরারোগ্যমৈশ্বর্য়ং লভতে চান্নসংপদঃ|

ইদং স্তোত্রং পঠেদ্যস্তু প্রাতঃকালে দ্বিজোত্তমঃ ||১২||

অক্লেশাদন্নসিধ্যর্থং জ্ঞানসিধ্যর্থমেব চ|
অভ্রশ্যামঃ শুদ্ধয়জ্ঞোপবীতী সৎকৌপীনঃ পীতকৃষ্ণাজিনশ্রীঃ
ছত্রী দণ্ডী পুণ্ডরীকায়তাক্ষঃ পায়াদ্দেবো বামনো ব্রহ্মচারী ||১৩||

অজিনদণ্ডকমণ্ডলুমেখলারুচিরপাবনবামনমূর্তয়ে|
মিতজগত্ত্রিতয়ায় জিতারয়ে নিগমবাক্‌পটবে বটবে নমঃ||১৪||

শ্রীভূমিসহিতং দিব্যং মুক্তামণিবিভূষিতম|
নমামি বামনং বিষ্ণুং ভুক্তিমুক্তিফলপ্রদম ||১৫||

বামনো বুদ্ধিদাতা চ দ্রব্যস্থো বামনঃ স্মৃতঃ|
বামনস্তারকোভাভ্যাং বামনায় নমো নমঃ ||১৬||